शारदा-गौरव-ग्रन्थ-माला...क्र. ६०

श्रीशृङ्गेरी 'श्री 'जगद्गुरु-करवीरागमोत्सवः ।

★

रचयिता

पं. फलटणकर नरहरिशास्त्री

★

प्रथम-शिलामुद्रणम्-पौष-पूर्णिमा शके १८०९
पुनर्-मुद्रणम्-चैत्रपूर्णिमा शके १९००

मूल्यं रूप्यक-त्रयम्

प्रकाशकः
पं. वसन्त अनन्त गाडगीळ
शारदा-गौरव-ग्रन्थ-माला
४२५ सदाशिव पेठ, पुण्यपत्तनम् ४११ ०३०

卐

卐

मुद्रकः
पं. वसन्त अनन्त गाडगीळ
श्रीशारदा-मुद्रण-सिद्धि-मन्दिरम्
४२५ सदाशिव पेठ, पुण्यपत्तनम् ३०
यशवन्त-मुद्रणालयः
१८३५ सदाशिव पेठ, पुण्यपत्तनम् ३०



प. पू. श्रीशृङ्गेरी-शारदापीठाधीश्वर-जगद्गुरु-
चरणारविन्द-सेवायां सश्रद्धं समर्पितम् —

प्रकाशकीयम् —

श्रेयसे प्रेयसे च ।

कोल्हापुरनगरी 'दक्षिणकाशी'त्वेन महाराष्ट्रेषु विख्याता। अत्र 'करवीर-निवासिनी'-श्रीमहालक्ष्मीमन्दिरं श्रीशक्तिपीठम्। 'महाकाली-महालक्ष्मी-महासरस्वती' इति देवता-त्रितयं कोल्हापुर-वासिभिः सश्रद्धं पूज्यते। वेद-विद्या-विदुषां षट्शास्त्र-नदीष्णानां कोल्हापुरस्थानि नैककुलानि भारतख्यातानि श्रूयन्ते। संस्कृत-पत्रिका-प्रवर्तकेषु मूर्धन्यानां विद्यावाचस्पति-राशिवडेकर अप्पाशास्त्रिणाम् इयं कर्मभूमिः। अत्रैव पञ्चगङ्गा-तीरे विराजते जगद्गुरु-श्रीशंकराचार्याणां श्रीकरवीर-सङ्केश्वरपीठम्। सर्वप्राचीनस्य श्रीशृङ्गेरी-शारदा-मूलपीठस्यैव शाखाभूतम्। इदं पीठं महाराष्ट्रजनानां श्रद्धा-निधानम्।

श्रीशृङ्गेरी-शारदापीठाधीश्वरैः प. पू. श्रीसच्चिदानन्द शिवाभिनवनृसिंह-भारती-'श्री'चरणैः सनाथीकृतं शुभागमनेन श्रीकरवीर-क्षेत्रं १८०९ शकसंवत्सरे। तदानीं प. पू. जगद्गुरु 'श्री'-चरणानां पुण्यदर्शनेन, जगदम्बा-सपर्या-शोभायात्रा-पादपूजादि-साक्षात्करणेन च स्वात्मानं धन्यं मन्यमानेन पं फलटणकर नरहरिशास्त्रिणा हृद्यां शैलीम् आश्रित्य देववाण्या मधुराक्षरीकृतः मनोरमः पद्यबन्धः शिलामुद्रितः समुपलब्धः श्रीशृङ्गेरी-शारदा-पीठस्थे ग्रन्थालये।

लघुकायस्य महाशयस्य ग्रन्थरत्नस्य तस्य माहात्म्यं नैक-विधम्। प्रथमं तावत् नवति-वर्ष-पूर्वस्य समाजस्य, धर्मक्षेत्रस्य विद्या-विश्वस्य च जीवच्चित्रम् आस्माकीने मानस-पटले सम्यक् समुट्टङ्कितं क्रियते ग्रन्थरत्नेन एतादृशेन। द्वितीयं च तदानीं श्रीशृङ्गेरी-करवीरसंकेश्वर-पीठयोर् मध्ये विराजमानं सौहार्दं सामाञ्जस्यं परस्पर-संमानन-सत्त्ववृत्तिमूलं सौजन्यं स्फुटीभवति। अनेन सांप्रतिकैः संकेश्वर-करवीर-पीठाधिपैः किमपि प्रबोधनम् उद्बोधनं च स्वीकृत्य समादृताः चेत् प. पू. शृङ्गेरीशारदापीठाधीश-महास्वामिनः गौरव-वर्धकं स्यात् तत् तेषाम्। तृतीयं च जीवत्-संस्कृतस्य प्रमाणम् अनेन निमित्तेन सांप्रतिक-संस्कृत-विश्वस्य पुरस्तात् स्थापयितुं शक्यम्।

एतादृशं व्यवहारदशायां विराजमानं संस्कृतं सदैव नः श्रेयसे प्रेयसे च। शारदोपासक-विश्वं सर्वं तत् पाठं पाठं स्वात्मानं संस्कृतात्मानं संपादयतु इति शम्।

— गाडगीलोपाह्वः वसन्तशर्मा

श्रीशृङ्गेरी-मठस्थस्य दिग्-विजेतुर् जगद्गुरोः

आनन्ददो विजयते —

श्रीशृङ्गेरी-श्री-जगद्गुरु-करवीरागमोत्सवः ।

फलटणकरोपाह्वेन नरहरिशास्त्रिणा

विरचय्य

आर्यप्रबोध-यन्त्रालये मुद्रितः

यदाज्ञासेतुमारभ्य वरीवर्त्याहिमाचलम् ।
जगज्जगद्गुरुः पायात् सशिवाभिनवाभिधः ॥ १
अष्टादश-शत-संख्ये स-नवेब्दे शालिवाहनाभिख्ये ।
तिष्ये शृङ्गेरीशः कोलापुरमाजगाम विश्वगुरुः ॥ २
शृङ्गेरीपुर-पीठस्थो यात्रां कुर्वन् जगद्गुरुः ।
पौष-शुक्ल-प्रतिपदि कोलापुरमुपागमत् ॥ ३
प्रातः स्नात्वा कोटितीर्थे चकाराह्निकमात्मनः ।
तावत् पौराः पुरं नेतुमुपकण्ठमुपाययुः ॥ ४
अमात्यो माधवः श्रीमान् पण्डितो गुरुराययौ ।
अधिकारी खानरायो बलवानक्षदर्शकः ॥ ५
नारायणः पुरोधाश्च रामचन्द्रो मुहूर्तवित् ।
विश्वनाथो न्यायदर्शी लक्ष्मणो राजकार्यवित् ॥ ६
बापुरायोऽपि तत्रागात् काळे इत्युपनामकः ।
शिवरामोऽध्यापकोऽथ विष्णुर् वैद्य-शिरोमणिः ॥ ७
आगाशे कृष्णरायश्च बलवन्तौ च शिक्षकौ ।
उमाजिरायो नागेशः कृष्णो नारायणो बली ॥ ८
शूरास्तथेङ्गळे-नानासाहेब-प्रमुखाः मुदा ।
राज्ञोऽनुयायिनः सर्वे ययुरामन्त्रिताः परे ॥ ९
शास्त्रिणो वैदिकाः शूराः शिल्पिनो वणिजो विशः ।
लिपिकरा ययुः पूर्वं तेषामप्यधिकारिणः ॥ १०
सर्वे समाययुस्तत्र दर्शनोत्कण्ठिताशयाः ।
गणेशः प्रमुखः कार्ये शंकरो मार्गदर्शकः ॥ ११

गुर्वाज्ञां प्रेक्षमाणौ तौ साञ्जली पुरतः स्थितौ ।
समाप्ते चाह्निके पश्चाद् गुरुर् दृष्टिपथं ययौ ॥ १२
राज्ञो ज्योतिर्विदा तत्र रामचन्द्रेण सद्गुरुः ।
प्रथमं वन्दितः पश्चाच्चक्रुः सर्वेऽभिवादनम् ॥ १३
विलोक्य सस्मितं सर्वान् करुणापाङ्ग-वीक्षणैः ।
पप्रच्छ कुशलं तत्र पर्वेन्दु-वदनो यतिः ॥ १४
सुवर्ण-शिबिकां पश्चादारुरोह जगद्गुरुः ।
सुवर्णाम्बर-संवीतो रत्नमौलि-विराजितः ॥ १५
मुक्ताहार-प्रभा-भास्वद्-वक्षाः शाटी-पटान्तरः ।
विभूति-विलसद्-भालः प्रणवोच्चरणादरः ॥ १६
लसद्-रुद्राक्ष-वलय-व्यापृतात्मशयः स्वयम् ।
चन्द्रमौलीश्वर-सखः सर्व-पुण्य-जनैर् वृतः ॥ १७
रराज राजराजो वा तदानीं नरवाहनः ।
शिबिकास्थस्ततः किञ्चित् खानसाहेबशर्मणा ॥ १८
संवादमारचय्याथ प्रतस्थे पुरमृद्धिमत् ।
नासीत् पुरौकसामेव तदानन्दो दिवौकसाम् ॥ १९
निर्गच्छति गुरावासीदामोद-सुम-वर्षणम् ।
लाजवृष्टिं तथा चक्रुः सर्वे पौराः ससंभ्रमम् ॥ २०
वाचामगोचरो जज्ञे तदानन्दः पुरौकसाम् ।
नदन्ति दन्तिनो यत्र हया ह्रेषन्ति सर्वतः ॥ २१
शङ्ख-तूर्य-मृदङ्गानामारावो दिवमस्पृशत् ।
प्रगाढ-जन-संमर्दादध्वा नाभूत् प्रगच्छताम् ॥ २२
ययौ पौरैः पूज्यमानः स्त्रीभिर् नीराजितः पथि ।
नागरीं सुषमां पश्यंश्छत्र-चामर-पण्डितः ॥ २३
दिवापि दीपिका यस्य पुरतो जय-सूचिकाः ।
विभान्ति सर्व-विद्यानामालयस्य जगद्गुरोः ॥ २४
संमर्द-भूयिष्ठतया शिबिकाऽगाच्छनैः शनैः ।
क्रोश-पादमितः पन्थाः कृच्छ्राद्यामेन लङ्घितः ॥ २५

प्रथमं 'श्री'-दर्शनार्थं महाद्वारमुपाययौ ।
नाभूद् देवालये मार्गोऽप्याचार्यस्य प्रगच्छतः ॥ २६
पुनः किमस्मदादीनां वार्तां तत्र ब्रवीम्यहम् ।
शृङ्गाणि दीपमालाश्च प्रतोल्यङ्गण-वीथयः ॥ २७
समन्ततो व्यदृश्यन्त जनयन्त्यो जनानिव ।
उत्तीर्य शिबिकायाश्च देवी-द्वारे ततः पदा ॥ २८
प्राप्य हेरम्बमम्बायाः पुरोर्वतिनमार्चयत् ।
स्वीयैर् दत्तकरः पार्श्वे गर्भागारं ततोऽभ्ययात् ॥ २९
दृष्ट्वैव स महालक्ष्मीमाहूत इव सत्वरम् ।
द्वारे सर्वान् परित्यज्य स्वयमेकोऽन्तराविशत् ॥ ३०
पिधेहि द्वारमित्युक्त्वा किं चकार ततो मुनिः ।
न वेद कोऽपि सैवैका व्यजानाज्जगदम्बिका ॥ ३१
प्रत्यक्षीकृत्य पद्मां तां दक्षिणाभिः प्रपूज्य च ।
शनैः प्रेमाश्रु-सलिलं मुञ्चन्नानन्द-तुन्दिलः ॥ ३२
यामार्द्धेन बहिर्-द्वारमगाल्लक्ष्म्या विसर्जितः ।
महाकाली-सरस्वत्यौ पूजयित्वातिभक्तितः ॥ ३३
आरुह्य शिबिकां पश्चाद् दत्तात्रेयं प्रपूज्य च ।
महाद्वारेण निर्गत्य ययौ विठ्ठल-मन्दिरम् ॥ ३४
यं द्रष्टुं दूरतोऽप्यागात् संख्यातीतो जन-व्रजः ।
यैर् दृष्टो जगदाचार्यो विद्वद्भिः पामरैरपि ॥ ३५
ते तदोचुर् महत्पुण्यात् साक्षाद् भाग्यमुपस्थितम् ।
शिबिकायास्त्वथोत्तीर्य गत्वा विठ्ठल-मन्दिरम् ॥ ३६
मध्ये संस्थापिते सिंहासने चोपविवेश सः ।
ज्योतिर्विद् रामचन्द्रोऽथ पाद-पूजां सदक्षिणाम् ॥ ३७
कृत्वार्पयामास तदैवोर्णं स्वर्णमयं महत् ।
प्रसादं जगृहुः सर्वेऽप्याचार्यानुज्ञया ततः ॥ ३८
नाम-निर्वचनं चक्रे गणेशः शास्त्र-वित् तदा ।
लब्ध-प्रसादास्ते सर्वे मन्यमानाः कृतार्थताम् ॥ ३९

गृहं यथागतं जग्मुः शंसन्तोऽपूर्विकां श्रियम् ।
गुरोरनुचरास्तस्त्र देव-पीठमुपह्वरे ॥ ४०
तदा संस्थापयामासुर्दर्शनीयं मनोरमम् ।
अन्तःस्वर्णमयं चारु बही राजतमृद्धिमत् ॥ ४१
चन्द्रमौलीश्वरो मध्ये रत्नगर्भो गणेश्वरः ।
उभावप्यासेचनकौ स्यातामन्वर्थ-धारिणौ ॥ ४२
शारदाम्बा पूजितासीद् बहवोऽन्ये सुरेश्वराः ।
महाभिषेकः संजज्ञे नित्यं च विभवोन्नतः ॥ ४३
यावदाह्निकमस्यासीत् सा तिरस्कणी पुरः ।
तस्यां निःसारितायां तु सर्वे दर्शनमाप्नुवन् ॥ ४४
आबाल-वृद्ध-वनितं जनास्तद्-दर्शनोत्सुकाः ।
काल-त्रयेऽप्युपाजग्मुर् ग्रामाद् ग्रामान्तरादपि ॥ ४५
मङ्गलार्तिक्य-काले तु महेन्द्र-भवनोपमम् ।
तत् स्थानं ददृशे रात्रौ परमानन्द-दायकम् ॥ ४६
नासीत् तत्र स्थितस्यार्तिर् नाशा गृह-गमाय च ।
बलान्निसारिता यान्ति परं विरह-भीरवः ॥ ४७
मृदङ्ग-शङ्ख-तूर्याणि वादयन्ति पृथक् पृथक् ।
चतुर्वेद-विदो नित्यं पृथग् वेदान् पठन्ति च ॥ ४८
सुब्रह्मण्यः काशिनाथो विद्वान् गङ्गाधरस्तथा ।
सर्व-शास्त्र-विदः सर्वे गोपालः शब्द-शास्त्र-वित् ॥ ४९
रामशास्त्री सोमयाजी दक्षो नारायणः परः ।
अन्येऽपि शास्त्रिणः केचिदासन् दिग्जयिनोऽन्तिके ॥ ५०
शब्द-न्याय-विदः केचिद् विवदन्ते परस्परम् ।
मीमांसा-साङ्ख्य-योगानां विवादोऽपि प्रजायते ॥ ५१
तूष्णींभूतेषु विद्वत्सु यदाचार्य-मुखाम्बुजात् ।
निर्वाणदा प्रवहति निखिलोपनिषत्-सुधा ॥ ५२
तस्यां सर्वे निमज्जन्ति परमानन्द-निर्वृताः ।
यद्यपि स्थल-संकोचात् स्यातुं पीडा प्रजायते ॥ ५३

तथाऽप्यहंपूर्विकया गत्वा तिष्ठन्त्यथाग्रतः ।
भुक्त्वा प्रसादमाज्ञप्तास्तथापि न चलन्ति हि ॥ ५४
एवमासीदानिशीथं प्रत्यहं परमोत्सवः ।
आगत्याहरहर्लोकः शतशो दक्षिणां ददौ । ५५
पाद-पूजा-समारम्भस्ततः प्रववृते महान् ।
पूजयित्वा महालक्ष्मीमागच्छन्तं जगद्गुरुम् ॥ ५६
पौराणिको वासुदेवो द्वितीये दिवसेऽर्चयत् ।
पौराणिकोऽप्यबाशास्त्री तृतीयेऽपूजयद् गुरुम् ॥ ५७
गोखले विश्वनाथाख्यो न्यायाधीशोऽपि भक्तितः ।
चतुर्थी भजतेऽवस्थां यतो यति-गणेश्वरः ॥ ५८
ततश्चतुर्थ्यामानर्च चतुर्थार्थ-प्रसिद्धये ।
जगामासौ मठे नित्यं वेदान्त-श्रुति-लोलुपः ॥ ५९
सीतारामः पुराणज्ञो पञ्चम्यां भक्ति-संयुतः ।
पाद-पूजां चकाराथ षष्ठयां चोलकराङ्गना ॥ ६०
षष्ठयामेव महालक्ष्मीराचार्यैरभिपूजिता ।
महाकाली-सरस्वत्यौ हेरम्बश्चापि पूजितः ६१
महालक्ष्म्यै महावस्त्रमर्पितं च सदक्षिणम् ।
महाकाल्यादयो वस्त्रैर्दक्षिणाभिश्च पूजिताः ॥ ६२
महाभिषेकः संजज्ञे चण्डीपाठाः शताधिकाः ।
ब्राह्मणैः पठितास्तेपि दक्षिणाभिः प्रतोषिताः ॥ ६३
सर्वे देवाश्चाभिषिक्ताः सर्वतोऽपि सदक्षिणम् ।
द्वितीये दिवसे विप्राः पक्वान्नैरधितर्पिताः ॥ ६४
अभूत् स च समारम्भः पन्त-माधव-सद्मनि ।
जनानां वेद-साहस्री तृप्तासीत् तद्दिने परम् ॥ ६५
तत्राचार्यागमे धूलि-पूजा पन्तेन सा कृता ।
नाभुङक्त पन्तोऽप्यासायं विप्रेभ्यो दक्षिणां ददौ ॥ ६६
रामचन्द्रोऽप्यदात् तद्वद् गणेशश्चापि दक्षिणाः ।
शास्त्रिणो वेदपाठज्ञास्तथा पौराणिकाश्च ये ॥ ६७

लिपिकरास्तथैवान्ये परिवेषण-तत्पराः ।
गोखले शंकरः सर्वकार्यद्रष्टा स्थितस्तदा ॥ ६८

समारम्भस्त्वपूर्वोऽभूदिति सर्वे प्रशंसिरे ।
दत्तात्रेयश्च सप्तम्यां नन्दग्रामकरोऽर्चयत् ॥ ६९

पादौ तथार्चयामास रामचन्द्रोऽष्टमी-दिने ।
चक्रे नारायणः पूजां नवम्यां नृपतेर्गुरुः ॥ ७०

आगाशे कृष्णरायश्च तथा नारायणोऽर्चकः ।
तदह्न्येवाकरोत् पूजां नागेशः पाटणाधिपः ॥ ७१

भिक्षामभ्यर्चयाञ्चक्रे बह्वीं चाददात् स दक्षिणाम् ।
महावस्त्रं तथा शाटीमर्पयामास भक्तितः ॥ ७२

कर्नाटको रामचन्द्रोऽप्यौर्णमर्पितवान् पथि ।
अस्यां रात्रौ देशिकेन महान् दीपोत्सवः कृतः ॥ ७३

प्रदक्षिणं परिक्रामत् श्रीलक्ष्मी-शिबिकानुगः ।
देवालये तदा लोकः संख्यातीतः समागमत् ॥ ७४

हिम्मतबहादरः पूजाम् उदाजीराय-नामकः ।
महार्घेणार्चयाञ्चक्रे वस्त्रेण दशमी-दिने ॥ ७५

* * * *

तथा जगद्गुरुः श्रीमान् करवीरमठाधिपः
जगद्गुरोरागमनं प्रतीक्षन्नत्र तस्थिवान् ॥ ७६

आगते जगदाचार्ये स्वमठं दशमी-दिने ।
आनाय्य संमुखीनोऽभूद् द्वारपर्यन्तमादरात् ॥ ७७

नीत्वोपवेशयामास स्थिते सिंहासने शुभे ।
यथाविधि प्रणम्याथ पादपूजामचीकरत् ॥ ७८

यदा भू-मण्डल-गुरुं संकेश्वर-जगद्गुरुः ।
पूजयामास तद् दृष्ट्वा सर्वे सुमनसोऽभवन् ॥ ७९

* * * *

अर्पयामासतुर्वस्त्रं महार्धं तौ परस्परम् ।
बलवान् वारवारकरोऽप्यर्चयामास तद्दिने । ८०
काळे विनायकोऽप्यस्मिन्नर्हयामास वासरे ।
यदासीद् दशमीवृद्धिस्तस्यां राजपुरोहितः ॥ ८१
नारायणोऽर्चयत् प्रीत्या भिक्षादान-पुरःसरम् ।
महार्घं वसनं चादान्महतीं दक्षिणां तथा ॥ ८२
शालाधिकारी बलवान् तदह्न्येवार्चयद् गुरुम् ।
राजकोटं गता आसन् यद्यप्यस्मन्महीभुजः ॥ ८३
तथापि खानरायेण महान् पूजोत्सवः कृतः ।
एकादश्यामिन्दु-दिने मण्डिते राजमन्दिरे ॥ ८४
आययौ जगदाचार्यः साक्षाच्छिव इवाम्बरात् ।
तत्रैव गुरुवर्यस्य नित्यं तद्-दर्शनोत्सुकैः ॥ ८५
निष्कासिता प्रतिकृतिः प्रकाशालेख्य-यन्त्रतः ।
आचार्यमागतं दृष्ट्वा ननर्तेव नृपाङ्गणम् ॥ ८६
तत्रत्यमुत्सवं वक्तुं न मे प्रभ्वी गिरां ततिः ।
तद्दिने रामदुर्गेशो राजा श्रीव्यङ्कटाभिधः ॥ ८७
भक्त्या श्रीगुरुपादाब्ज-नमस्यां समचीकरत् ।
पूजा व्यङ्कटरायेण तस्मिन्नेव दिने कृता ॥ ८८
ओकोपनाम्ना सद्वस्त्रं दक्षिणाभिः समर्पितम् ।
तदैव ब्राह्मणी काचित् सुन्दरा चाप्यपूजयत् ॥ ८९
द्वादश्यां तु महाराज्ञी बाबासाहेबभूपतेः ।
पादपूजां चकोरोच्चैर् गुरु-भिक्षा-पुरस्कृताम् ॥ ९०
ददौ स्वर्णमयं पात्रमभिषेकाय सुन्दरम् ।
सुवर्ण-मुद्रिका-वस्त्रं महानर्घं ददौ ततः ॥ ९१
भक्त्या रोमाञ्चित-तनुः प्रावोचद् गद्गदाक्षरम् ।
द्रष्टव्या करुणापाङ्गैर् अहं शंकर-किङ्करी ॥ ९२
गुरुणानन्दिताऽहल्या वचोभिर् अमृतावहैः ।
गुर्वाज्ञयाऽप्यनिच्छन्ती मन्दिरं प्रययौ मठात् ॥ ९३

त्रयोदश्यां महाराज्ञी राजाराम-महीभृतः ।
आनाय्य जगदाचार्यं राजमन्दिरमादरात् ॥ ९४

पूजयामास सद्भक्त्या समर्प्य स्वर्ण-मुद्रिकाः ।
अभिषेकाधार-यन्त्रं ददौ स्वर्णमयं ततः ॥ ९५

महार्हमर्पयामास वस्त्रं भिक्षा-पुरस्कृतम् ।
प्रेमार्द्र-नयना भूत्वा प्रणनाम पुनः पुनः ॥ ९६

सकवाराभिधा राज्ञी सा ययौ कृतकृत्यताम् ।
यातिवृद्धा महाराज्ञी बुवासाहेब-भूपतेः ॥ ९७

राजसी पूजयामास जगद्गुरु-पदाम्बुजम् ।
वस्त्र-सौवर्ण-मुद्राभिरथागात् परमां मुदम् ॥ ९८

शिवाजी-नृपते राज्ञी बाला भक्तिबलात् तदा ।
तत्रैवानर्च निखिल-भुवनाचार्य-पादुके ॥ ९९

आनन्दी सा गुरोर्वाक्य-सुधयान्वर्थतां दधौ ।
सुवस्त्रैः स्वर्णमुद्राभिः पूजितो गुरुराण् मुदा ॥ १००

सत्कृत्य सर्वा वासोभिराश्रमं पुनराययौ ।
घाटेगणपतिः पादौ चतुर्दश्यां समर्हयत् ॥ १०१

तत्रार्चयद् रामचन्द्रोऽप्यङ्घ्री धर्माधिकारवान् ।
वामनो जमदग्निश्च विपश्चित् तद्दिने मुदा ॥ १०२

समर्प्यानर्घ्य-वसनं देशिकं समपूजयत् ।
कृत्वा क्षौरं पौर्णमास्यां पञ्चनद्यास्तटेऽमुना ॥ १०३

आसायं तिष्ठता विप्रा दक्षिणाभिः प्रतोषिताः ।
पौष-कृष्ण-प्रतिपदि रामचन्द्रोऽर्चयत्पुनः ॥ १०४

त्रिवारमेवमाचार्यो प्रीत्या ज्योतिर्विदार्चितः ।
तद्दिने या सभा वेदशास्त्राभ्यासाभिनन्दिनी ॥ १०५

नूत्ना प्रादुर्बभूवात्र तस्या येत्वधिकारिणः ।
तैरुत्सवः कृतोत्युच्चै राजोपाध्यायसद्मनि ॥ १०६

तत्रामात्यमुखाः सर्वे महान्तश्चाधिकारिणः ।
खानसाहेबप्रमुखास्तद्वदक्षर-चञ्चुकाः ॥ १०७

विद्वांसो दिक्षु विख्यातास्तथा वेदविदोऽपरे ।
सभायामाययुः सायं पातुमाचार्य-वाक्सुधाम् ॥ १०८

तुङ्गसिंहासनारूढो भासा विद्योतयन् दिशः ।
दृष्टो जगद्गुरुः सर्वैरुदयस्थो यथा रविः ॥ १०९

आस्तां सभासदाध्यक्षौ बलवन्तावुभावपि ।
श्रीमानमात्यः प्रथमो न्यायाधीशस्तथापरः ॥ ११०

तत्र विष्णुर्विश्वनाथः कार्ये प्रमुखतः स्थितौ ।
सभाकार्यविचारेऽभूत् गोखलेशंकरो मुखम् ॥ १११

विष्णुश्चक्रे धूलिपूजां भुवनाचार्यपादयोः ।
निर्गच्छतु गुरोर्वक्त्रात् शुद्धाऽमृतसरस्वती ॥ ११२

इतीव विश्वनाथोऽपि मधुरोपराक्रमं जगौ ।
ततः सुधामयी श्रीमद्देशिकेन्द्रमुखाम्बुजात् ॥ ११३

सुस्राव भारती शुद्धा ह्यद्वैताब्धि-विगाहिनी ।
तत्र धर्मप्रवचनं प्रकुर्वन्ति जगद्गुरौ ॥ ११४

न कोप्यानन्दबाष्पोदैरनार्द्रः स्थावरादृते ।
आचान्तमधुमाधुर्यां कुसुमाक्षर-तुन्दिलाम् ॥ ११५

वाचमाचम्य केत्वत्र ततृपुर्न धृतादराः ।
परःसहस्रमप्यासीत् स्थितं चित्रमिवाक्रियम् ॥ ११६

मुहूर्तत्रयतो वाणी बलादेवोपसंहृता ।
तदन्ते सहसोत्थाय गणेशः प्रेमयन्त्रितः ॥ ११७

गुणैकदेशगुणितमाचार्यागमनोत्सवम् ।
जगौ धैर्येण सर्वेऽपि यच्छ्रुत्वा कम्पयन् शिरः ॥ ११८

अथासेचनिका चित्रा राजती सुममण्डिता ।
अर्पिता गुरवे सभ्यैः सा च पुष्प-करण्डिका ॥ ११९

मयापि पठितान्यत्र धैर्यात् पद्यानि कानिचित् ।

तानि च —

सच्चिदानन्दकन्दाय शिवाभिनवमूर्तये ।
भारती-भूषितास्याय नृसिंहगुरवे नमः ॥ १

अस्माकमाद्या बुधवृन्द-हृद्या श्रीवेदविद्या जनतापहृद् या ।
सभ्यादृताभ्यासबलेन हीना सागन्तुमैच्छत् क्षयमक्षयापि ॥ २

ततोऽसौ वेदशास्त्राणामभ्यासमभिनन्दितुम् ।
सभा प्रादुर्बभूवात्र करवीरे सभासदाम् ॥ ३

आगच्छन्ति सभावलोककुतुकाः केचिद् विपश्चिद्वरा
विद्याभ्यास-धुरंधराः कतिपये दातुं परीक्षामपि ।
सत्कारं प्रतिपद्य शक्त्यनुगुणं यान्ति प्रमोदं गता
यत्रैतत्पुरमृद्धिमेतु सततं श्रीशारदावासतः ॥ ४

सन्मार्ग-प्रतिपादनेन दयया हन्तुं तमोऽज्ञानिताम्
लोकान् पावयितुं निजाश्रमगतान् हंसाश्रमी संचरन् ।
अस्मद्-भाग्य-समुच्चयेन महता सर्वाद्यविद्यानिधिर्
मूर्तः प्रादुरभूच्चिरेण जगदाचार्योऽत्र कोलापुरे ॥ ५

यैषा मुञ्चति कर्हिचिन्न जगदाचार्योपकण्ठं स्थिता
शुद्धा कीर्तिरिवावृणोति महसा श्रीशारदाम्बा जगत् ।
तस्याः पुष्पकरण्डिकेयमधुना शिष्यैः पदाब्जेऽर्पिता
स्वीकुर्वन्तु मुदार्चनाय जगदाचार्यास्तु तां राजतीम् ॥ ६

ततः सुमनसः सर्वे ववृषुः कुसुमोत्करान् ॥ १२०

ततः शेषैर्नुतः श्रीमानाचार्यः स्वमठं ययौ ॥
द्वितीयायां त्वथाचार्यैः शिष्टानां भोजनोत्सवः ॥ १२१

कृतस्तत्रागमन् सर्वेऽप्यमात्य-बुध-मन्त्रिणः ।
सुधा-माधुर्य-मधुरमास्वाद्यान्न-रसं जनाः ॥ १२२

नैवातृप्यन् प्रशंसन्तस्तृप्ताश्चाकण्ठमुत्सुकाः ।
तृतीयायां पादपूजां चक्रे गोपालनायकः ॥ १२३

महार्हवाससाच्छाद्य सुवर्णकुसुमान्यथ ।
ववर्ष शीर्षोपरिष्ठात् स्वर्णमुद्रास्ततो ददौ ॥ १२४

धन्योऽहमिति चोवाच हर्षाश्रुः पुलकाञ्चितः ।
यदाऽमन्त्रितुमायातः पन्तरायो गुरुं मठे ॥ १२५

तदाचार्यस्तमौर्णेनाच्छादयामास वाससा ।
तस्यामेव तृतीयायां पन्तरायः समाधवः ॥ १२६

बलवानर्चयामास महोत्सव-पुरःसरम् ।
महती दक्षिणा दत्ता सवस्त्रा प्रीतिपूर्वकम् ॥ १२७

गृह्णातु सततं सेवां गुरुरित्यर्थयत् स्वयम् ।
दत्वाशीर्वचनं तस्मै निर्जगाम ततो गुरुः ॥ १२८

कृष्णा च कागलाधीशाङ्गना तस्मिन् दिने गुरोः ।
पादपूजां चकारोच्चैर् महावस्त्र-प्रदानतः ॥ १२९

बालकृष्णगिरिश्चापि तस्मिन्नेवार्चयद् दिने ।
चतुर्थ्यां कागलाधीशा पुनरभ्यर्चयद् गुरुम् ॥ १३०

वस्त्रं चादात् तदनुगा ममता चाप्यपूजयत् ।
विश्रान्तिरनुभूताऽसीत् पञ्चम्यां गुरुणा स्वयम् ॥ १३१

गणेशशास्त्रिणा षष्ठ्यां पूजितः श्रीजगद्गुरुः ।
पूजां तु कारयामास पितुर्हस्तेन नम्रधीः ॥ १३२

हरशर्मा पिता यस्य गणेशस्तत्सुतः किल ।
तत्रैव कृष्णरायोऽपि मोघे इत्युपनामकः ॥ १३३

रौप्यं धूपेषिकापात्रं तथा रत्नाङ्गुलीयकम् ।
सदक्षिणं समर्प्यागात् पित्रा सह परां मुदम् ।। १३४

सप्तम्याः क्षय एवासीद् दुर्जनानां तथा पुरे ।
अष्टम्यामथ मार्तण्डनायको गुरुपूजनम् ।। १३५

चकार परया भक्त्या बहुमान-पुरस्सरम् ।
गीर्वाण-पाठशालास्ति यत्र तस्मिन् मठालये ।। १३६

मयारामपुरी तस्मिन्नहन्येवार्चयत् पदे ।
मानसिङ्गोऽर्चयत् तस्मिन् दिने पाटण-देशजः ।। १३७

मार्तण्ड-भागिनेयोऽपि बालकृष्णाभिधस्तथा ।
नवम्यामकरोत् पूजां भक्त्या श्रीगुरुपादयोः ।। १३८

सावनूरे पाण्डुरङ्गस्तस्यामेव तिथौ मुदा ।
जगदाचार्यवर्याणामर्चयामास पादुके ।। १३९

महिस्करोऽर्चयत् पादौ तस्मिन् नारायणो दिने ।
लक्ष्मणोऽप्यधिकारी यो गुणज्ञो विप्रपूजकः ।। १४०

प्रातरेवार्चयामास नवम्याम् आद्यदेशिकम् ।
गाईकवाड-दत्ताजीरायश्चानर्च तद्दिने ।। १४१

आनर्च कोडूलकरः कृष्णोऽपि दशमी-दिने ।
तद्दिनेऽमृतरायोऽपि पूजयामास देशिकम् ।। १४२

सरडे बाळकृष्णेन रौप्यपात्रं समर्पितम् ।
श्रीपाद गोलकश्चापि दशम्यामेव स स्वयम् ।। १४३

गत्वा मठं चापचितिं चकार गुरुपादयोः ।
प्रत्यहं मठमाजग्मुर्ये लोका दर्शनोत्सुकाः ।। १४४

तैः कृतो मुद्रिकाराशिरासीच्चरणयोः पुरः ।
परःशतं प्रतिदिनं प्राप्ता येऽतिथयो मठम् ।। १४५

ब्राह्मणाद्याश्च ते सर्वे बुभुजुः प्रीतिपूर्वकम् ।
प्रातर्गन्ता गुरुरिति ज्ञात्वा राज्ञ्यः ससंभ्रमम् ।। १४६

आगत्य प्रणताश्चक्रुः सत्कारं सर्वतोऽधिकम् ।
पन्तरायस्तदागत्य ददौ स्फाटिक-मालिकाम् ।। १४७

यामालोक्यादृष्टपूर्वां विद्वांसो विस्मयं ययुः ।
मङ्गलार्तिक्य-समये तस्यां रात्रौ पुरौकसाम् ॥ १४८
जज्ञे विरह-भीरूणां समाजः श्रीगुरोर्मठे ।
विद्वांसस्तत्र ये केचिद् वैदिकाः पण्डितास्तथा ॥ १४९
राज्ञो गुरुः पुरोधाश्च ज्योतिर्विन्मन्त्रिसत्तमः ।
पौराणिका गायकाश्च तथान्ये सेवकाश्च ये ॥ १५०
महार्घ-वस्त्रैर्वस्त्रैस्ते सत्कृता दक्षिणादिभिः ।
नैतादृशी दृष्टपूर्वा कुत्रचिद् विप्र-सत्कृतिः ॥ १५१
हसन्तश्च स्तुवन्तश्च ब्रुवन्तश्च परस्परम् ।
विचित्रैर्भूषिता वस्त्रैर्ब्राह्मणास्ते ययुर्गृहम् ॥ १५२
करवीरे नित्यमेवं वर्तमाने महोत्सवे ।
यात्रात्वासीत्ससहसामक्षिकेव सुभोजने ॥ १५३
एकादश्यां ततः प्रातर् गच्छतीति जगद्गुरुः ।
विरहोत्कण्ठितैः पौरैर् व्याप्तं विठ्ठल-मन्दिरम् ॥ १५४
पश्यन्तः प्रणमन्तोऽन्येऽप्यर्पयन्तः फलान्यथ ।
वदन्तो विवदन्तश्च निपेतुर् दर्शनोत्सुकाः ॥ १५५
विरहाद् रुरुदुः केचित् प्रशशंसुः सगद्गदम् ।
अहंपूर्विकया केचित् पादयोरपतन् पुरः ॥ १५६
तैर् अर्पितं पुरो द्रव्यं सहस्रावधि तद्दिने ।
यदा नावसरस्त्वासीत् स्थापितुं पुरतः फलम् ॥ १५७
तदा करे ददुः केचिदुत्सार्य जनमन्तिकात् ।
अतृप्तेष्वथ सर्वेषु जनेषु पुरवासिषु ॥ १५८
वाचा मधुरयाश्वास्याथारुह्य शिबिकां ययौ ।
महालक्ष्मीमथागत्य दक्षिणाभिः प्रपूज्य च ॥ १५९
महाकाली-सरस्वत्यौ श्रीहेरम्बं प्रपूज्य च ।
तदनुज्ञां गृहीत्वाथ राजमन्दिरमाययौ ॥ १६०
प्रतीक्षन्त्यो राजदाराः स्थितास्तद्दर्शनोत्सुकाः ।
दत्वाथ दर्शनं ताभ्यः पुरद्वारात् पुरो ययौ ॥ १६१

आसीममनुवव्राज पौरो विरह-विह्वलः ।
यथागमनकालेऽभूत् सत्कारः श्रीजगद्गुरोः ।। १६२

तथा गमन-कालेऽपि दुःखमेवात्यरिच्यत ।
कथंचिल्लोकपाथोधिमुत्तीर्य नगराद् बहिः ।। १६३

संनिवर्तयितुं सर्वमनुयान्तं महाजनम् ।
शिबिकां स्थापयामासुराज्ञया श्रीगुरोश्चराः ।। १६४

संमर्दे नावकाशोऽभूत् तदा स्थापयितुं पदम् ।
कृच्छ्रेण शिबिकामात्रं बलादासीत् पदं कृतम् ।। १६५

माधवो बलवान् पन्तो खानरायोऽधिकारवान् ।
विश्वनाथो गणेशश्च शंकरश्चापि किंकरः ।। १६६

श्रीमन्तोऽन्ये महान्तश्च विद्वांसः श्रेष्ठिनस्तथा ।
श्रीगुरोः पुरतस्तस्थुः सर्वे साञ्जलयो नताः ।। १६७

मन्त्रयित्वा मुहूर्तं स सर्वानाश्वास्य सस्मितम् ।
प्रतस्थे पुरतः श्रीमान् विहायास्मान् प्रपश्यतः ।। १६८

श्यामः कमलपत्राक्षो बृहद्-बाहुस्तथोन्नतः ।
गूढजत्रुः पृथुप्रोथो कम्बु-कण्ठोऽमित-द्युतिः ।। १६९

ब्रह्म-सूत्री ज्ञान-शिखः सर्व-विद्या-गुणाम्बुधिः ।
सदा सत्कर्म-निरतो निग्रहानुग्रह-प्रभुः ।। १७०

आश्रमोऽपि यमाश्रित्य चतुर्थः फलवानभूत् ।
दीक्षितो दान-यजने सुस्मितो भूति-भूषितः ।। १७१

रुद्राक्ष-मालाभरणो मुक्तामणि-विराजितः ।
गतो मानसमादाय श्रीमानपि यतीश्वरः ।। १७२

अस्माकमिति शंसन्तो गतार्था इव संकटात् ।
परावृत्यापि पश्यन्तो पौराः सर्वे ययुर्गृहम् ।। १७३

यथामति विरच्यैतज्जगद्गुरु-पदाम्बुजे ।
वाक्-शुद्धयेऽर्पयामास शिष्यो नरहरिः परम् ।। १७४

यदा नाम गुरोः पूजा बभूवास्मद्-गृहे तदा।
कृतानि गद्य-पद्यानि पुरतो विलिखाम्यहम् ॥

स्वस्ति श्रीमज्जगदण्ड-मण्डल-मण्डन-प्रताप-मार्तण्ड-मण्डित-दोर्दण्ड-परिष्कृत-वरदण्ड-खण्डित-प्रचण्डाखण्ड-पाखण्ड-खण्डं निःशेष-निरस्त-दुस्तरतर-समस्त-जन-तम-स्तोम-मुख-सोम-निसर्ग-निरर्गलनिर्गलद्-अमृत-
-सरस्वती-प्रवाह-प्रशमित-भव-दव-भवदनल्प-संताप-प्रपञ्चं पर-परा-
जयापादितानेक-कुतर्क-समुदय-समुदयदखर्वं-गर्व-सर्वस्व-पर्वत-
भर-तिरस्कृत-वसुंधरा-सुरासुरायमाण-द्वैतिजन-नवीनवन-समूल-
भञ्जन-प्रभञ्जनं परिस्फुरद्-दिव्य-भव्याव्यय-नव्य-तेजोवै-
भव-पराभवितान्तरायकर-निकरं मुमुक्षुणेव विरक्तेन प्रपदा-
वलम्बिना तनुतरेणान्तेवासिना परिधानीय-शाटीपटेन
वन्द्यमान-पद-पङ्कज-युगलम् उपकण्ठम् उपसर्पता परि-
धिनेव सुवर्णगुणेनोत्तरीय-वाससा परिवेष्टित-वदन-
चन्द्रं निस्तुलामल मौलि-मण्डन-मण्डितोत्तमाङ्गं
भसित-प्रभा-विभासितभालं यशसा विशालं
प्रणत-पालं दुर्जन-कालं
हृत-भव-जालं क्षपित-भू-भारं
धृतमुक्ताहारं स्वात्म-विहारं
श्रौतमर्यादाधारं प्रवर्तित-सदाचारं
योग-प्रचारं कृतात्म-विचारम्
अद्वैतचारं चामीकर-शिबिकाचारम्
अनल्प-बुद्धि-विस्तारं
निखिल-विद्या-निलयं
जित-भू-वलयम् आमोद-वन-
मलयं कृत-दुरित-लयं
श्रीमत्-परमहंस-परिव्राजका-
चार्य-श्रीसच्चिदानन्द-शिवाभि-
नव-नरसिंह-भारतीश्वर-जगद्गुरुं
पुरु-प्रणतिभिः सततं समुपास्महे ॥

त्यक्तदण्डोऽपि यो दण्डी द्विजराजोऽपि भूचरः ।
हंसोऽपि यो घनानन्दः कर्मन्दी वन्दितो मया ॥

सच्चित्-सुखाभिमुख-चित्त-लता-प्ररोहम्
श्रीमत्-शिवाभिनव-योग-भुवां निधानम् ।
श्रीभारती-विलसितानन-पङ्कजातम्
श्रीमन्नृसिंहयतिराजमहं नमामि ॥

श्रीसच्चिदानन्दशिवाभिनवाख्या-विभूषितः ।
भारती-परिणीतः श्रीनरसिंहो विराजते ॥

अथवा

सद्वाक्यैश्चिति संप्रविश्य परमानन्देन पूर्णः शिवम् ।
कुर्वन् भू-वलयस्य योऽभिनवया लक्ष्म्या समालिङ्गितः ॥
संहर्तुं नरसिंह एष चरति श्रौतद्विषो दानवान् ।
यद्-वक्त्राब्जभवा पुनाति भुवनं श्रीमत्-सुधा-भारती ॥

नरान् संसरतः क्लिष्टान् रक्षितुं कृत-विग्रहः ।
सिन्धुर्दयायाः प्रत्यक्षो हर एष विराजते ॥

उद्दण्डाखण्ड-पाखण्ड-खण्ड-खण्डन-मण्डनः ।
दण्डी-पाण्डित्य-कोदण्डः कोऽपि मण्डयते महीम् ॥

सदागमैर् मानसमाकलय्य व्यगाहि यैर्विष्णुपदं विशालम् ।
सर्वत्र मुक्तारतयश्चरन्तो हंसाधिराजाः शुचयः पुनन्तु ॥

यस्याज्ञां शिरसा वहन्ति महतीम् आद्वीपमुर्वीभृतो
विश्रान्तं दशदिक्षु हन्ति तिमिरं यत्-कीर्ति-चन्द्रोदयः ।
संचारः शिबिकागतस्य जगतो मोक्षाय यस्यावनौ
तस्मै देशिक-सार्वभौम-गुरवे कुर्वे नमः सन्ततम् ॥

चामीकराम्बर-विराजित-विग्रह-श्रीर्
धर्मावन-प्रकटिताप्रतिम-प्रभावः ।
अद्वैत-बोध-परिनन्दित-जीवलोकः
शोकं धुनोति जगतो गुरुरेष दृष्टः ॥ १०

यः शृङ्ग-शैल-नगरे निवसन् स्वशक्त्या
चेतः प्रवर्तयति वेदपथे प्रजानाम् ।
श्रीशारदा-वरद-पीठमधिष्ठितोऽसौ
प्रेम्णा विलोकयतु भूरि जगद्गुरुर्नः ॥ ११

सुवर्ण-शिबिकागतं निखिल-वर्ण-संसेवितम्
अनल्प-महिमावली-वलित-बन्दि-शब्द-स्तुतम् ।
प्रदीप्त-दिन-दीपिका-स्फुट-विकासिताशा-जयम्
वयं भुवनदेशिकं पदनताः सदोपास्महे ॥ १२

किं ब्रूमहेऽस्य महिमानमिहावलोके
लिल्युर्मनांसि महसा सहसैव यस्य ।
कस्येन्दुमौलिरितरस्य सदोपकण्ठे
कस्यार्चनेऽस्ति गणपः स च रत्नगर्भः ॥ १३

भूतिर्भालतले विभाति विमलालेखेव यस्यैन्दवी
शाटी चाप्युरसि स्थिरेव चपला संलक्ष्यते काञ्चनी ।
रत्नालंकृत-मौलि-मण्डित-शिरा विद्या-विलासाङ्गणम्
साक्षादेष जगद्गुरुः सुसुकृतैरत्रैव दृष्टो मया ॥ १४

शास्त्रं तु साफल्यमुपैति येन
लक्ष्मी स्थिराऽभूद् यमवाप्य लोला ॥
जोषं सदा तिष्ठति यः स्वरूपे
लीलातनुः शं स गुरुर्ददातु ॥ १५

प्रतिदिनं रचिताः श्लोकाः ।

विमलाद्वैत-मतये यतये पतये सताम् ।
परमानन्द-रुचये शुचये रचयेऽञ्जलिम् ॥ १
भूतिः[१] सनातनी भालेऽप्युपकण्ठे च भारती ।
यत्रोभे संगते तस्मै श्रीजगद्गुरवे नमः ॥ २
अरुणेक्षण-पद्माय करुणामृत-सिन्धवे ।
बन्धवे सर्वलोकानां श्रीजगद्गुरवे नमः ॥ ३

संकेश्वरकर-जगद्गुरुमठे भिक्षाऽभूत् तदानींतनं पद्यम्

सदाश्रम-गतौ[२] हंसौ[३] नित्यं विष्णु[४]पदं गतौ ।
आक्रान्त-मानसौ[५] वन्दे करवीर[६]-समागमौ ॥ ४

अज्ञात-ध्वान्त-वलय-विलयोदय-शालिने ।
नमः परमहंसाय संसार-भय-नाशिने ॥ ५

महान्तो मस्करकराः[७] कुम्भिनो[८] दानशालिनः[९] ।
अनेकपा दुराधर्षा जयन्ति यति-कुञ्जराः ॥ ६

भाले विभूतिः शशिनः कलेव
गले च माला भुजगालिरेव ।
नेत्रत्रयं रक्तमिदं यदङ्गे[१०]
जगद्गुरुः शंकर एव साक्षात् ॥ ७

---

१ भस्म ऐश्वर्यं च । २ श्रमः आश्रमश्च । ३ पक्षी भिक्षुश्च ४ नभः ब्रह्म च । ५ सरः मनश्च । ६ वृक्षः पुरं च । ७ शुण्डा हस्तश्च । ८ गण्डस्थलं कुम्भश्च । ९ दानोदकं वितरणं च । १० शाटी परिधानीय-कौपीनवस्त्राणि च ।

कृतेन [11] द्वापरेणालं[12] त्रेता[13] न त्रातुमीश्वरी ।
कलिना[14] किं मुमुक्षा चेज्जगदाचार्यमाश्रय ॥ ८

आलोकेन[15] तमो[16] निहत्य दयया संकाश्य सर्वा दृशो[17]
मन्देहान्[18] विनिगृह्य दस्युनिवहे[19] येनाहितं साध्वसम् ।
विश्वं पावयितुं सदाश्रमगतो यः प्राप्य विष्णोः पदम्
लोकानुग्रहमातनोति विचरन् हंसाय तस्मै नमः ॥ ९

भ्राजत्-सुवर्ण-पत्राय[20] ह्यनन्त[21]-पथ-गामिने ।
नानागम[22]-विहाराय हंसाय[23] शुचये नमः ॥ १०

न गोत्रभिद् वज्रधरो[24] न सोमः[25]
श्रीदोऽपि नो दण्डधरः कृतान्तः
न मार्गणो[26] वा विशिखोऽपि[27] यस्तम्
भूमण्डलाचार्यमुपाश्रितोऽस्मि ॥ ११

सदागमान्त-संचारम् आमोद[28]-वन-वासिनम् ।
वन्दे सुमनसाऽकृष्टं[29] द्विरेफ[30] श्रीजगद्गुरुम् ॥ १२

यति-तति-पति-पद-नति-रतिर्
अति-पतितं चापि पूज्यतां नयति ।
एवं सति बत किमिति
सुमतिभिरपरैरुपास्यते न यतिः ॥ १३

---

११ युगं करणं च । १२ युगं संशयश्च । १३ युगम् अग्नित्रयं च । १४ युगं कलहश्च । १५ प्रकाशः अवलोकनं च । १६ ध्वान्तम् अज्ञानं च । १७ दृष्टिः ज्ञानानि च । १८ राक्षसाः सालसाश्च १९ चोराः रिपवश्च । २० पक्षः शिबिका च । २१ आकाशः अनेकमार्गाश्च । २२ वृक्षः शास्त्रं च । २४ हीरकः पविश्च । २४ कुबेरः । २५ बाणः याचकश्च । २६ बाणः शिखाहीनश्च । २७ वृक्षः शास्त्रं च । २८ सुगन्धः आनन्दश्च । २९ पुष्पं सुचित्तश्च । ३० भ्रमरः रेफद्वयश्च ।

त्वया दृशा यो जनतापवर्गदो
पीयूषगुः सर्वकलाकलापभृत् ।
रक्ताम्बरः श्रीः शिवमौलिमण्डनो
यतीन्द्रराजो भवतापतोऽवतु ।।

विशिखोऽप्योजसा चित्रं शिखावान् इव लक्ष्यते ।
हंसराजोऽप्यथात्मानम् अहंस इति मन्यते ।। १५

मामेव परिधत्तेऽसौ संन्यस्याप्यखिलं यतिः ।
इतीव देशिकाचार्ये सदासीद् रक्तमम्बरम् ।। १६

कामं कोपं यतिर्लोभं मदं मात्सर्यमेव च ।
त्यक्त्वा च मोहमानन्दमपवर्गप्रियोऽश्नुते ।। १७

वेणुः करे यस्य विरागहेतुः[३१]
साक्षान्मया[३२] पीडित[३३]-पाद-पद्मः ।
यश्चात्मगो[३४]ऽभीष्टफलप्रदोऽस्मान्
कृष्णो[३५] यतीन्द्रः परमापदोऽव्यात् ।। १८

सागस्यपि न तत्रास न तत्रासहरस्तु यः ।
स संसारभयाद् अव्याद् अव्याजचरितो गुरुः ।। १९

यत्-सर्वदागमाभ्यासाद्
हंसानां मानसंवसे ।
तत्र स्थाप्या वयं हंसैर्
नित्यमित्यर्थयामहे ।। २०

यद्-दृष्ट्यैव तमः समस्त-निवहः सद्यो जगाम क्षयम्
चेतश्चात्मविचार-तत्परमभूद् यद् वाचमाचम्य च ।
यातं यत्कृपया भ्रमप्रद-मदोद्वैतं तथा द्वैतताम्
प्रीतः सोऽस्तु जगद्गुरुर् नरहरिच्छात्रेण वाचार्चितः ।। २१

———

३१ विरक्तिः रागबाहुल्यं च। ३२ लक्ष्म्या मया च। ३३ आपीडितम् ईडितं च। ३४ गोपिष्टम् अपि इष्टदश्च । ३५ कृष्णः शामश्च ।

शारदा – १९ : १७ ★ रजि.क्र.पीएन्सी.१४५ ★ लायसेन्स क्र. ४४
पुण्यपत्तने 411 030 पृथक्करण-कार्यालयाय २०–५–७८ दिने समर्पितम्

संपादकः मुद्रकः प्रकाशकः स्वामी – वसन्त अनन्त गाडगीळ, B.A.B.Ed
कार्यालयः – सुमनागर, १७०/५/अ, पर्वती, पुणे ९

दूरवाणी क्र. ४४२१९७ (प्रातः ९ तः १२)

मुद्रणस्थलम् – यशवन्त मुद्रणालयः १८३५ सदाशिव, पुण्यपत्तनम् ३०.
प्रकाशनस्थलम् – श्री. ल. म. चक्रदेव, ३१८ राममोहनमार्गः, मुम्बापुरी ४.
खजिना-महाल-भवनम् ४२५ सदाशिव, पुण्यपत्तनम् ३०
पत्र-मञ्जूषा (पोस्ट-बॉक्स) क्र. ७५०, पुणे ४११ ०३०



कृष्णः (म्युरलपेण्टिङ्ग, छेरा, मट्टणचेरी)

शारदा
संपादकः वसन्त अ. गाडगीळ

सौर १६ वैशाख १९००
६ मे १९७८